शव, विकारे। गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) शवति चित्तं कामः। इति दुर्गादासः॥

शवं, क्ली, (शवति गच्छतीति। शव+अच्।) जलम्। इति मेदिनी॥

शवः, पुं, क्ली, (शवति दर्शनेन चित्तं विकरोतीति। शव विकारे+अच्।) मृतशरीरम्। तत्पर्य्यायः। कुणपः २। इत्यमरः॥ क्षितिवर्द्धनः ३। इति शब्दरत्नावली॥ मृतकम् ४। इति वराहपुराणम्॥*॥ तद्दाहविधिर्यथा,—

"नष्टसंज्ञं समुद्दिश्य ज्ञात्वा मृत्युवशं गतम्।
महावनस्पतिं गत्वा गन्धांश्च विविधानपि॥
घृततैलसमायुक्तं कृत्वा वै देहशोधनम्।
तेजो व्यपकरं चास्य तत् सर्व्वं परिकल्प्य च॥
दक्षिणायां शिरः कृत्वा सलिले तं निधाय च।
तीर्थाद्यावाहनं कृत्वा स्नापनं तस्य कारयेत्॥
गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः।
कुरुक्षेत्रञ्च गङ्गा च यमुना च सरिद्वरा॥
कौशिकी च पयोष्णी च सर्व्वपापप्रणाशिनी।
गण्डकी भद्रनामा च सरयूर्बलदा तथा॥
वनानि नव वाराहं तीर्थं पिण्डारकं तथा।
पृथिव्यां यानि तीर्थानि चत्वारः सागरास्तथा॥
सर्व्वाणि मनसा ध्यात्वा स्नानमेवन्तु कारयेत्।
प्राणान्तन्तु तं ज्ञात्वा चितां कृत्वा विधानतः॥
तस्या उपरि तं स्थाप्य दक्षिणाग्रं शिरस्तथा।
देवानभिमुखान् ध्यात्वा गृह्य हस्ते हुताशनम्॥
प्रज्वाल्य विधिवत्तत्र मन्त्रमेतदुदीरयेत्।
कृत्वा सुदुष्करं कर्म्म जानता वाप्यजानता॥
मृत्युकालवशं प्राप्य नरः पञ्चत्वमागतः।
धर्म्माधर्म्मसमायुक्तो लोभमोहसमावृतः॥
दह एतस्य गात्राणि देवलोकाय गच्छतु।
एवमुक्त्वा ततः शीघ्रं कृत्वा चैव प्रदक्षिणम्॥
ज्वलमानं तदा वह्निं शिरःस्थाने प्रदापयेत्।
चातुर्व्वर्ण्येषु संस्कारमेवं भवति पुत्रक।
गात्राणि वाससी चैव प्रक्षाल्य विनिवर्त्तयेत्॥
मृतनाम समुद्दिश्य दद्यात् पिण्डं महीतले।
तदाप्रभृति चाशौचं देवकर्म्म न कारयेत्॥"

इति वाराहे श्राद्धोत्पत्तिनामाध्यायः॥

अन्यत् दाहशब्दे द्रष्टव्यम्॥*॥ तस्य स्पर्शे दोषो यथा,—

वाराह उवाच।

"स्पृष्ट्वा तु मृतकं भद्रे नरं पञ्चत्वमागतम्।
मम शास्त्रं बहिः कृत्वा यः श्मशानं प्रपद्यते॥
पितरस्तस्य सुश्रोणि आत्मानश्च पितामहाः।
श्मशाने जम्बुका भूत्वा भक्षयन्तः शवांस्तथा॥
ततो हरेर्व्वचः श्रुत्वा कर्म्मकामा वसुन्धरा।
उवाच मधुरं वाक्यं सर्व्वलोकहिताय वै॥

धरण्युवाच।

तव नाथ प्रपन्नानां कः पापं विद्यते प्रभो।
प्रायश्चित्तञ्च मे ब्रूहि येन शुध्यति किल्बिषात्॥

वाराह उवाच।

शृणु सुन्दरि! तत्त्वेन यन्मां त्वं परिपृच्छसि।
कथयिष्यामि ते ह्येदं शोभनं पापनाशनम्॥
एकाहारं दिनान् सप्त त्रिदिनं चाप्युपोषितः।
पञ्चगव्यं ततः पीत्वा शीघ्रं शुध्यति किल्बिषात्॥
शवे स्पृष्टेऽपराधस्य एष ते कथितो विधिः।
सर्व्वथा वर्जनीयो वै सर्व्वभागवतेन तु॥
य एतेन विधानेन प्रायश्चित्तं समाचरेत्।
विमुक्तः सर्व्वपापेभ्यः अपराधो न विद्यते॥"

अपि च।

वराह उवाच।

"स्पृष्ट्वा तु मृतकं देवि! यो मत्कर्म्मेषु तिष्ठति।
शतं वर्षसहस्राणि गर्भेषु परिवर्त्तते॥
दश वर्षसहस्राणि चण्डालश्चैव जायते।
अन्धः सप्तसहस्राणि मण्डूकश्च शतं समाः॥
मक्षिका त्रीणि वर्षाणि टिट्टिभैकादशं समाः।
दश वै सप्त चान्यानि कृकलासो भवेत् समाः॥
हस्ती वर्षशतञ्चैव खरो द्वात्रिंशको भवेत्।
मार्ज्जारो नव वर्षाणि वानरो दश पञ्च च॥
एवं स चात्मदोषेण मम कर्म्मपरायणः।
प्राप्नोति सुमहद्दुःखं देवि! एवं न संशयः॥
ततो हरेर्व्वचः श्रुत्वा दुःखेन परिपृच्छति।
सर्व्वसंसारमोक्षाय प्रत्युवाच वसुन्धरा॥
किमिदं भाषसे देव मानुषाणां दुरासदम्।
वाक्यं भीषणकञ्चैव मम कर्म्मप्रतोदकम्॥
आचाराश्च परिभ्रष्टस्तव कर्म्मपरायणः।
तरन्ति येन दुर्गाणि प्रायश्चित्तं तथा वद॥
श्रुत्वा पृथ्व्यास्ततो वाक्यं लोकनाथो जनार्द्दनः।
धर्म्मसंरक्षणार्थाय प्रत्युवाच वसुन्धराम्॥

वराह उवाच।

स्पृष्ट्वा तु मृतकं भूमे मम कर्म्मपरायणः।
एकाहारं ततस्तिष्ठेत् दिनानि दश पञ्च च॥
तत एवं विधिं कृत्वा पञ्चगव्यं तु प्राशयेत्।
शुद्धभावं विशुद्धात्मा कर्म्मणा च न लिप्यते॥
एतत्ते कथितं देवि स्पृष्ट्वा मृतकमेव च।
दोषञ्चैव विशुध्याथ यत्त्वया पूर्व्वपृच्छतम्॥
य एतेन विधानेन प्रायश्चित्तं समाचरेत्।
अपराधविनिर्मुक्तो मम लोकं स गच्छति॥"

इति वाराहे मृतदर्शनस्पर्शनप्रायश्चित्तनामाध्यायः॥*॥ शवानुगमनाशौचं यथा। कूर्म्मपुराणम्।

"प्रेतीभूतं द्विजं विप्रो योऽनुगच्छति कामतः।
स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति॥
एकाहात् क्षत्रिये शुद्धिर्वैश्ये च स्यात् द्व्यहेन तु।
शूद्रे दिनत्रयं प्रोक्तं प्राणायामशतं पुनः॥"

एतच्च घृतप्राशनं शुद्धिहेतुत्वान्नियमपरम्। न तु प्रायश्चित्ताङ्गीजनाभावपरम्। तत्र तपस्वात्तथा। अनुः सहार्थः। यत्तु याज्ञवल्क्यवचनम्।

"ब्राह्मणेनानुगन्तव्यो न तु शूद्रः कथञ्चन।
अनुगम्याम्भसि स्नात्वा स्पृष्ट्वाग्निं घृतभुक् शुचिः॥"

तत्प्रमादादनुगमने कथञ्चनेत्यभिधानात्। अम्भसि न तूद्धृतोदके॥*॥ शूद्रस्य ब्राह्मणशववहने दोषो यथा,—

"मृतब्राह्मणदेहांश्च दैवात् शूद्रा वहन्ति चेत्।
पदप्रमाणवर्षञ्च तेषाञ्च नरके स्थितिः॥
ततस्तेषाञ्च साहाय्यं करोति हरिरूपिणी।
ददाति मुक्तिं तेभ्योऽपि क्रमेण च कृपामयी॥
जन्म पुण्यवतां गेहे कारयित्वा च भारते।
स्थानं ददाति वैकुण्ठे निश्चितं जन्मभिस्त्रिभिः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४४ अध्यायः॥ शवदूषितगृहजलाशयादीनां शुद्धिर्यथा,—

ब्रह्मपुराणम्।

"येषामभक्ष्यं मांसञ्च तच्छरीरैर्युतञ्च यत्।
वापीकूपतडागेषु जलं सर्व्वञ्च दुष्यति॥"

तच्छरीरैर्मृतशरीरैः। उत्तरवचने कुणपग्रहणात्। यथा,—

"सकुणपं सकर्द्दमं तेभ्यस्तोयमपास्य तत्।
प्रक्षिपेत् पञ्चगव्यञ्च समन्त्रं सर्व्वशुद्धिकृत्॥
अपास्य कुणपं तेभ्यो बहुतोयेभ्य एव वा।
शतं षष्टाथवा त्रिंशत् तोयकुम्भान् समुद्धरेत्॥"

वापी ससोपाना। निःसोपानः कूपः। तडागः पद्माकरः। शतादिजलाल्पत्वाद्यपेक्षया अत्यल्पस्य सर्व्वोद्धारणाभिधानात्। एवं मरणसमये गृहान्निःसार्य्यते अन्यथा गृहस्य दुष्टता स्यात्॥ यथा, छन्दोगपरिशिष्टम्। यथा, कूर्म्मपुराणम्। यथा, बृहन्मनुः।

"श्वशूद्रपतिताश्चान्त्या मृताश्चेद्द्विजमन्दिरे।
शौचं तत्र प्रवक्ष्यामि मनुना भाषितं यथा॥
दशरात्राच्छुनि प्रेते मासाच्छूद्रे भवेच्छुचिः।
द्वाभ्यान्तु पतिते गेहे अन्त्ये मासचतुष्टयात्।
अत्यन्त्ये वर्ज्जयेद्गेहमित्येवं मनुरब्रवीत्॥"

द्वाभ्यां मासाभ्यां मासशब्दस्यानुषङ्गपाठात्। अन्त्यो म्लेच्छः। अत्यन्त्यः श्वपाकः। इति वाचस्पतिमिश्राः॥ यमः।

"द्विजस्य मरणे वेश्म विशुध्यति दिनत्रयात्।
दिनैकेन बहिर्भूमिरग्निप्रोक्षणलेपनैः॥"*॥

यथोक्तकालानन्तरकर्त्तव्यमाह सम्वर्त्तः।

"गृहशुद्धिं प्रवक्ष्यामि अन्तस्थशवदूषिते।
प्रोत्सृज्य मृण्मयं पात्रं सिद्धमन्नं तथैव च॥
गृहादपास्य तत् सर्व्वं गोमयेनोपलेपयेत्।
गोमयेनोपलिप्याथ छागेनाघ्रापयेद्बुधः॥
ब्राह्मणैर्मन्त्रपूतैश्च हिरण्यकुशवारिभिः।
सर्व्वमभ्युक्षयेद्वेश्म ततः शुध्यत्यसंशयः॥"

अत्र मन्त्रानादेशे गायत्री। देवलः।

"पञ्चधा वा चतुर्धा वा भूरमेध्या विशुध्यति।
दुष्टा द्विधा त्रिधा वापि शुध्यते मलिनैकधा॥
दहनं खननं भूमेरुपलेपनवापने।
पर्ज्जन्यवर्षणञ्चापि शौचं पञ्चविधं स्मृतम्॥
प्रसूते गर्भिणी यत्र म्रियते यत्र मानुषः।
चाण्डालैरुषितं यत्र यत्र विन्यस्यते शवः॥
विण्मूत्रोपहतं यच्च कुणपो यत्र दृश्यते।